# Vimshati Shloki Nrisimha DhyAnam

# વિંશતિશ્લોકી નૃસિંહધ્યાનમ્

## Document Information

Text title : Vimshati Shloki Nrisimha DhyAnam

File name : viMshatishlokInRRisiMhadhyAnam.itx

Category : vishhnu, dashAvatAra, viShNu, dhyAnam, viMshati

Location : doc_vishhnu

Proofread by : Manoj Kumar Barman

Description/comments : nRRisiMhakosha 3 upAsanA khaNDa uttarArdha

Latest update : August 11, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 11, 2025

*sanskritdocuments.org*

Vimshati Shloki Nrisimha DhyAnam

# વિંશતિશ્લોકી નૃસિંહધ્યાનમ્

અથ વિંશતિ શ્લોકી ધ્યાનમ્ ॥

મહાચક્રસ્ય નાભ્યાં તુ ચિન્તયેત્ ક્ષીરસાગરમ્ ।
ક્ષીરસાગરમધ્યસ્થં શ્વેતદ્વીપં વિચિન્તયેત્ ॥૧॥

તન્મધ્યે તુ મહાદિવ્યં પ્રાસાદં રત્નનિર્મિતમ્ ।
પ્રાસાદમધ્યે ચન્દ્રાભં સિંહાસનમનુત્તમમ્ ॥૨॥

તસ્યોપરિ મહાભાગં શેષાખ્યં ફણિમણ્ડિલમ્ ।
તદાસનગતં દેવં તત્ફણૈર્વ્યાપ્તમસ્તકમ્ ॥૩॥

પૂર્ણેન્દુ કોટિપ્રતિભં નીલકણ્ઠં ત્રિલોચનમ્ ।
બાલેન્દુમણ્ડિતસટં કુણ્ડલાભ્યાં વિરાજિતમ્ ॥૪॥

અનેકરત્નખચિતં મુકુટેન ચ શોભિતમ્ ।
કાઞ્ચ્યાઙ્ગુલીયવલયં નુપુરાઙ્ગદભૂષણૈઃ ॥૫॥

વરદાભયહસ્તં ચ ચક્રહસ્તં પિનાકિનમ્ ।
સર્વાઙ્ગસુન્દરં દેવં સર્વાભરણભૂષિતમ્ ॥ ૬॥

સ્રષ્ટારં સર્વજગતાં ત્રાતારં સર્વકામદમ્ ।
તારૈકાક્ષરમધ્યસ્થં નૃસિંહં દિવ્યરૂપિણં ॥ ૭॥

યોગપટ્ટાસનસ્થં ચ મહામાયેશ્વરં વિભુમ્ ।
વામભાગેશ્રિતાં દેવીં નીલકુઞ્ચિતમૂર્દ્ધજાઃ ॥ ૮॥

હેમારવિન્દપ્રતિભાં મૌક્તિકાભરણોજ્વલામ્ ।
દાડિમં સવ્યહસ્તેન દક્ષેનાલિઙ્ગ્ય સપ્રતિમ્ ॥ ૯॥

દેવસ્યાભિમુખીં ધ્યાયેદ્ભક્તાભીષ્ટફલપ્રદામ્ ।
લક્ષ્મ્યાદ્યાઃ શક્તયો દેવં વીજયન્ત્યઃ સમન્તતઃ ॥ ૧૦॥

લાવણ્યામૃતતોયેન સિંઞ્ચિત્યોઽપિ ચ સર્વશઃ ॥

શક્તિભિર્મદરત્નાભિઃ સર્વતઃ પરિવારિતમ્ ॥ ૧૧॥

સિદ્ધગન્ધર્વનાગૈશ્ચ વિદ્યાધરવધૂગણૈઃ ॥
ચામરૈવીરાજ્યમાનં ચ લક્ષ્મ્યાદ્યાભિશ્ચ શક્તિભિઃ ॥ ૧૨॥

ગાયન્તીભિસ્તુવન્તીભિર્નિષેવિતમ્ ।
સનકાદ્યૈયગિવરૈર્બ્રહ્મેશાદ્યૈઃ સુરોત્તમૈઃ ॥ ૧૩।
દક્ષેતિગ્મદ્યુતિં ચૈવ હિમાંશું વામતઃ સ્થિતમ્ ।
વેદૈઃ સાઙ્ગૈર્મન્ત્રવરૈસ્તૂયમાનં મુદાન્વિતમ્ ॥ ૧૪॥

ગીયમાનં સુદેવેશં સામગૈર્બ્રહ્મવાદિભિઃ ।
આયુધપ્રવરૈશ્ચૈવ મૂર્તિમદ્ભિરુપાસિતમ્ ॥ ૧૫॥

ષભિઃ સુદર્શનૈરન્તર્માયયા સમલઙ્કૃતમ્ ।
અષ્ટદ્વાદશપત્રસ્થૈઃ સેવિતં પરમ મુદા ॥ ૧૬॥

નારાયણૈર્વાસુદેવૈર્વેષ્ટિતં બ્રાહ્મમાયયા ।
માતૃકાભિઃ ષોડશભિસ્તયાન્તર્માયેયાવૃતમ્ ॥ ૧૭॥

દ્વાત્રિંશદ્ભિઃ નૃસિંહૈશ્ચ વેષ્ટિતં બાહ્મમાયયા ।
વસુભીર્રુદ્રૈરાદિત્યૈર્વિશ્વેદેવૈર્યથાક્રમં ॥ ૧૮॥

સર્વાપત્તારકં ચક્રં કાલાનલસમપ્રભમ્ ।
એવં નૃસિહં ચક્રસ્થં સકૃત્ધ્યાયાલિ યો નરઃ ॥ ૧૯॥

આચષ્ટે તારકં બ્રહ્મ કૃપાલુઃ પરમેશ્વરઃ ।
સર્વાપભ્દયો વિમુચ્યતે મૃત્યું જયતિ દુસ્તરમ્ ॥ ૨૦॥

ઐહિકામુષ્મિકાન્ભોગાન્પ્રાપ્નોત્યવ્યહતાન્નરઃ ॥
ય ઇદં પરમં ગુહ્યં નૃસિંહં ધ્યાનમુત્તમમ્ ॥
પઠત્યનુદિનં ભક્ત્યા નૃસિંહત્વમવાપ્નુયાત્ ॥ ૨૧॥

ઇતિ શેષભગવત્કૃતં વિંશતી શ્લોકી ધ્યાનં સમાપ્તમ્ ॥

Proofread by Manoj Kumar Barman

*Vimshati Shloki Nrisimha DhyAnam*

pdf was typeset on August 11, 2025

Please send corrections to *sanskrit@cheerful.com*